प्राध्यापक (संस्कृत शिक्षा) प्रतियोगी परीक्षा - 2018
(साहित्य)

पुस्तिका में पृष्ठों की संख्या : 16
Number of Pages in Booklet : 16

पुस्तिका में प्रश्नों की संख्या : 150
No. of Questions in Booklet : 150

प्रश्न-पत्र पुस्तिका संख्या / Question Paper Booklet No. **5130213**

# LSk-02

परीक्षा दिनांक :- 06/08/20
समय :- 9:00 to 12:00

**Paper Code : 04**

**SUBJECT : Sahitya**

**Paper - II**

**समय : 3.00 घण्टे**
**Time : 3.00 Hours**

**अधिकतम अंक : 300**
**Maximum Marks : 300**

**प्रश्न-पत्र पुस्तिका एवं उत्तर पत्रक के पेपर सील/पॉलिथीन बैग को खोलने पर परीक्षार्थी यह सुनिश्चित कर लें कि उसके प्रश्न-पत्र पुस्तिका पर वही प्रश्न-पत्र पुस्तिका संख्या अंकित है जो उत्तर पत्रक पर अंकित है । इसमें कोई भिन्नता हो तो वीक्षक से दूसरा प्रश्न-पत्र प्राप्त कर लें । ऐसा न करने पर जिम्मेदारी अभ्यर्थी की होगी ।**
**The candidate should ensure that Question Paper Booklet No. of the Question Paper Booklet and Answer Sheet must be same after opening the Paper Seal / Polythene bag. In case they are different, a candidate must obtain another Question Paper. Candidate himself shall be responsible for ensuring this.**

## परीक्षार्थियों के लिए निर्देश

1. **सभी** प्रश्नों के उत्तर दीजिए ।
2. **सभी** प्रश्नों के अंक समान हैं ।
3. प्रत्येक प्रश्न का केवल **एक** ही उत्तर दीजिए ।
4. एक से अधिक उत्तर देने की दशा में प्रश्न के उत्तर को गलत माना जाएगा ।
5. प्रत्येक प्रश्न के चार वैकल्पिक उत्तर दिये गये हैं, जिन्हें क्रमश: 1, 2, 3, 4 अंकित किया गया है । अभ्यर्थी को सही उत्तर निर्दिष्ट करते हुए उनमें से केवल एक गोले अथवा बबल को उत्तर पत्रक पर **नीले बॉल प्वाइंट पेन** से गहरा करना है ।
6. **OMR** उत्तर पत्रक इस परीक्षा पुस्तिका के अन्दर रखा है । जब आपको परीक्षा पुस्तिका खोलने को कहा जाए, तो उत्तर-पत्र निकाल कर ध्यान से केवल **नीले बॉल पॉइंट पेन** से विवरण भरें ।
7. **प्रत्येक गलत उत्तर के लिए प्रश्न अंक का 1/3 भाग काटा जायेगा ।** गलत उत्तर से तात्पर्य अशुद्ध उत्तर अथवा किसी भी प्रश्न के एक से अधिक उत्तर से है । किसी भी प्रश्न से संबंधित गोले या बबल को खाली छोड़ना गलत उत्तर नहीं माना जायेगा ।
8. मोबाइल फोन अथवा इलेक्ट्रोनिक यंत्र का परीक्षा हॉल में प्रयोग पूर्णतया वर्जित है । यदि किसी अभ्यर्थी के पास ऐसी कोई वर्जित सामग्री मिलती है तो उसके विरुद्ध आयोग द्वारा नियमानुसार कार्यवाही की जायेगी ।
9. कृपया अपना रोल नम्बर ओ.एम.आर. पत्रक पर सावधानीपूर्वक सही भरें । गलत अथवा अपूर्ण रोल नम्बर भरने पर **5 अंक** कुल प्राप्तांकों में से काटे जा सकते हैं ।

**चेतावनी** : अगर कोई अभ्यर्थी नकल करते पकड़ा जाता है या उसके पास से कोई अनधिकृत सामग्री पाई जाती है, तो उस अभ्यर्थी के विरुद्ध पुलिस में प्राथमिकी दर्ज कराते हुए विविध नियमों-प्रावधानों के तहत कार्यवाही की जाएगी । साथ ही विभाग ऐसे अभ्यर्थी को भविष्य में होने वाली विभाग की समस्त परीक्षाओं से विवर्जित कर सकता है ।

## INSTRUCTIONS FOR CANDIDATES

1. Answer **all** questions.
2. **All** questions carry equal marks.
3. Only **one** answer is to be given for each question.
4. If more than one answers are marked, it would be treated as wrong answer.
5. Each question has four alternative responses marked serially as **1, 2, 3, 4**. You have to darken only one circle or bubble indicating the correct answer on the Answer Sheet using **BLUE BALL POINT PEN**.
6. The **OMR** Answer Sheet is inside this Test Booklet. When you are directed to open the Test Booklet, take out the Answer Sheet and fill in the particulars carefully with **blue ball point pen** only.
7. **1/3 part of the mark(s) of each question will be deducted for each wrong answer.** A wrong answer means an incorrect answer or more than one answers for any question. Leaving all the relevant circles or bubbles of any question blank will not be considered as wrong answer.
8. Mobile Phone or any other electronic gadget in the examination hall is strictly prohibited. A candidate found with any of such objectionable material with him/her will be strictly dealt as per rules.
9. Please correctly fill your Roll Number in O.M.R. Sheet. **5 Marks** can be deducted for filling wrong or incomplete Roll Number.

**Warning :** If a candidate is found copying or if any unauthorized material is found in his/her possession, F.I.R. would be lodged against him/her in the Police Station and he/she would liable to be prosecuted. Department may also debar him/her permanently from all future examinations.

**इस परीक्षा पुस्तिका को तब तक न खोलें जब तक कहा न जाए ।**
**Do not open this Test Booklet until you are asked to do so.**

**04**

1. "प्रस्तुताऽप्रस्तुतानां च तुल्यत्वे" अलङ्कारः कः स्यात् ?

(1) दीपकालङ्कारः

(2) तुल्ययोगितालङ्कारः

(3) समासोक्ति-अलंकारः

(4) विशेषोक्ति-अलङ्कारः

2. प्रतिवस्तूपमालङ्कारस्योदाहरणं वर्तते

(1) मेधां बुधः सुधामिन्दुर्बिभर्त्ति वसुधां भवान् ।

(2) तापेन भ्राजते सूर्यः शूरश्चापेन राजते ।

(3) सङ्कुचन्ति सरोजानि स्वैरिणीवदनानि च ।

(4) या दातुः सौम्यता सेयं सुधांशोरकलङ्कता ।

3. उपमानोपमेययोः चेत् विशेषः स्यात् तर्हि अलङ्कारः कथ्यते –

(1) दृष्टान्तः

(2) व्यतिरेकः

(3) तुल्ययोगिता

(4) अर्थान्तरन्यासः

4. अर्थान्तरन्यासस्योदाहरणं विद्यते –

(1) अयमैन्द्रीमुखं पश्य रक्तश्चुम्बति चन्द्रमाः ।

(2) शैला इवोन्नताः सन्तः किन्तु प्रकृतिकोमलाः ।

(3) तृणान्यङ्कुरयामास विपक्षनृपसद्मसु ।

(4) हनूमानब्धिमतरद्दुष्करं किं महात्मनाम् ।

5. "कारणे सति कार्यस्य अनुत्पत्तिः" अलङ्कारो भवति –

(1) विशेषोक्तिः

(2) विभावना

(3) विनोक्तिः

(4) सहोक्तिः

6. "समासोक्तिः परिस्फूर्तिः प्रस्तुतेऽप्रस्तुतस्य चेत्" इत्यत्र "प्रस्तुते" इति पदस्य कोऽर्थः ?

(1) उपमाने

(2) उपमेये

(3) वाचकशब्दे

(4) साधारणधर्मे

7. "सदृशयोः वाक्यार्थयोः ऐक्यारोपः" – लक्षणमिदं कस्यालङ्कारस्य ?

(1) यमकालङ्कारस्य

(2) दृष्टान्तालङ्कारस्य

(3) निदर्शनालङ्कारस्य

(4) उल्लेखालङ्कारस्य

8. "कार्यादिः कारणाद्यवधारणं च" इति लक्षणमस्ति –

(1) अनुमानस्य

(2) दृष्टान्तस्य

(3) दीपकस्य

(4) रूपकस्य

9. मेघदूते प्रथमश्लोके कविना कीदृशं मङ्गलाचरणं प्रस्तुतम् –

(1) नमस्कारात्मकम्

(2) वस्तुनिर्देशात्मकम्

(3) आशीर्वादात्मकम्

(4) मङ्गलात्मकम्

10. के चेतनाऽचेतनेषु प्रकृतिकृपणाः भवन्ति ?

(1) धर्माऽऽर्ताः

(2) दुःखाऽऽर्ताः

(3) कामाऽऽर्ताः

(4) सुखाऽऽर्ताः

11. मेघस्य कस्मिन् भागे सगन्धः चातकः मधुरं नदति ?

(1) वामभागे

(2) दक्षिणभागे

(3) उपरिभागे

(4) अधोभागे

12. समुचितेन पदेन सूक्तिं पूरयत –
रिक्तः सर्वो भवति हि लघुः ______ गौरवाय ।
(1) गुरुता
(2) रिक्तता
(3) धर्मता
(4) पूर्णता

13. कः प्रार्थनाचाटुकारः प्रियतम इव स्त्रीणां सुरतग्लानिं हरति ।
(1) पत्रश्यामः
(2) आम्रकूटः
(3) शिप्रावातः
(4) ज्ञातास्वादः

14. महाकविना कालिदासेन वागर्थाविव कौ वर्णितौ ?
(1) लक्ष्मीनारायणौ
(2) पार्वतीपरमेश्वरौ
(3) जानकीरामचन्द्रौ
(4) कौशल्यादशरथौ

15. रघुवंशस्य छन्दसां प्रणवः इव महीक्षितामाद्यः नृपः आसीत् –
(1) वैवस्वतोमनुः
(2) राजेन्दुः दिलीपः
(3) प्रतापवान् रघुः
(4) अजः

16. नृपदिलीपस्य पत्नी सुदक्षिणा आसीत् –
(1) विदेहवंशजा
(2) मिथिलावंशजा
(3) मगधवंशजा
(4) अवधवंशजा

17. पुत्रकाम्यया सुदक्षिणादिलीपौ कस्य आश्रमं जग्मतुः ?
(1) कण्वस्य
(2) वाल्मीकेः
(3) विश्वामित्रस्य
(4) वशिष्ठस्य

18. समुचितेन पदेन सूक्तिं पूरयत –
प्रतिबध्नाति हि ______ पूज्यपूजाव्यतिक्रमः ।
(1) प्रेयः
(2) श्रेयः
(3) गरीयः
(4) स्नेहः

19. प्रतिमानाटकस्य कस्मिन्नङ्के प्रतिमाः वर्णिताः ?
(1) द्वितीयेऽङ्के
(2) तृतीयेऽङ्के
(3) चतुर्थेऽङ्के
(4) षष्ठेऽङ्के

20. इयमेका पृथिव्यां हि मानुषीणामरुन्धती ।
एषा अरुन्धती का ?
(1) सूत्रधारस्य पत्नी
(2) विश्वामित्र–पत्नी
(3) सीतासखी
(4) वशिष्ठधर्मपत्नी

21. "धन्याभूमिर्वर्तते यत्र सीता" इयमुक्तिः कस्य विद्यते –
(1) दशरथस्य
(2) भरतस्य
(3) रावणस्य
(4) रामस्य

22. प्रतिमानाटके सीतायाः सखी का ?

(1) अरुन्धती

(2) अवदातिका

(3) नन्दिनिका

(4) विजया

23. गोपहीना यथा गावो विलयं यान्त्यपालिताः ।
एवं नृपतिहीना हि विलयं यान्ति वै प्रजाः ।।
श्लोकोऽयं कस्य पात्रस्य वर्तते

(1) सुमन्त्रस्य

(2) काञ्चुकीयस्य

(3) रामस्य

(4) वशिष्ठस्य

24. "कविताकामिन्याः महाकविभासः ______ ।"
समुचितेन पदेन रिक्तस्थानं पूरयत –

(1) विलासः

(2) कर्णपूरः

(3) चिकुरः

(4) हासः

25. द्वितीयपादमात्रे यस्मिन् अष्टादशमात्राः भवन्ति तस्य छन्दसः नाम वर्तते –

(1) मन्दाक्रान्ता

(2) आर्या

(3) शिखरिणी

(4) अनुष्टुप्

26. इन्द्रवज्रा छन्दसः लक्षणान्ते गुरुः प्रयुज्यते –

(1) चतुर्वारम्

(2) एकवारम्

(3) त्रिवारम्

(4) द्विवारम्

27. "ननमयययुतेयं मालिनी भोगिलोकैः"
उपर्युक्त लक्षणे 'लोकः' शब्देन का संख्या सूच्यते ?

(1) नव

(2) अष्ट

(3) सप्त

(4) पञ्च

28. निम्नलिखितपंक्तौ छन्दसः नाम किम् ?
"मनोरथानामतटप्रपाताः ।"

(1) उपेन्द्रवज्रा

(2) इन्द्रवज्रा

(3) उपजातिः

(4) शालिनी

29. चतुर्भिर्यकारैः युक्तं छन्दः कथ्यते –

(1) द्रुतविलम्बितम्

(2) वंशस्थम्

(3) भुजङ्गप्रयातम्

(4) वसन्ततिलका

30. शिखरिणीछन्दसि प्रतिपादं कतिषु वर्णेषु यतिः भवति ?

(1) 4, 6, 7

(2) 12, 5

(3) 11, 6

(4) 6, 11

31. प्रतिपादं चतुर्दशवर्णाः कस्मिन् छन्दसि भवन्ति ?

(1) उपजातिः

(2) वसन्ततिलका

(3) द्रुतविलम्बितम्

(4) मन्दाक्रान्ता

32. शार्दूलविक्रीडित-छन्दसः चतुर्षु चरणेषु कति वर्णाः भवन्ति ?

(1) (76) षट्सप्ततिः

(2) (84) चतुरशीतिः

(3) (58) अष्टपञ्चाशत्

(4) (60) षष्टिः

33. सप्त–सप्त–सप्तभिश्च वर्णैः यतिः कस्मिन् छन्दसि भवति ?
(1) शिखरिणी
(2) मन्दाक्रान्ता
(3) शार्दूलविक्रीडितम्
(4) स्रग्धरा

34. शब्दस्य शक्त्यन्तरानन्तरिता शक्तिः का ?
(1) अभिधा
(2) लक्षणा
(3) व्यञ्जना
(4) तात्पर्याख्यवृत्तिः

35. सङ्केतः कुत्र गृह्यते ?
(1) व्यक्तौ
(2) उपाधिषु
(3) व्यक्तेरुपाधिषु
(4) क्रियासु

36. रूढावुपादानलक्षणायाः उदाहरणमस्ति –
(1) श्वेतो धावति ।
(2) कुन्ताः प्रविशन्ति ।
(3) कलिङ्गः साहसिकः ।
(4) कर्मणि कुशलः ।

37. लक्षणायाः हेतवः प्रोक्ताः –
(1) एकः हेतुः
(2) चत्वारः हेतवः
(3) द्वौ हेतू
(4) त्रयः हेतवः

38. ______ शब्दस्य व्यञ्जना द्विधा ।
समुचितेन पदेन कारिकां पूरयत –
(1) व्यंजनालक्षणामूला
(2) लक्षणामूला
(3) अभिधामूला
(4) अभिधालक्षणामूला

39. "आयुर्घृतम्" उदाहरणं वर्तते –
(1) उपादानलक्षणा – साध्यवसाना – सारोपा – शुद्धा – प्रयोजनस्य
(2) लक्षणलक्षणासारोपा – शुद्धा – प्रयोजनस्य
(3) उपादानलक्षणासारोपा – गौणी – प्रयोजनस्य
(4) लक्षणलक्षणा – साध्यवसाना – गौणी – रूढेः

40. कोऽयं भावः सचेतसां रसतामेति ?
(1) विभावः
(2) अनुभावः
(3) स्थायी भावः
(4) संचारिभावः

41. विभावादिरत्यादिप्रकाशसुखचमत्कारात्मकः कः ?
(1) अखण्डः
(2) स्वप्रकाशः
(3) चिन्मयः
(4) ब्रह्मास्वादसहोदरः

42. लोके काव्यनाट्ययोः यः कार्यरूपः सः कोभावः ?
(1) विभावः
(2) स्थायी भावः
(3) अनुभावः
(4) संचारिभावः

43. 'शमः' कस्य रसस्य स्थायी भावः ?
(1) वीरस्य
(2) शान्तस्य
(3) करुणस्य
(4) रौद्रस्य

44. हास्यरसस्य वर्णः कः ?
(1) कपोतः
(2) श्वेतः
(3) नीलः
(4) श्यामः

45. महेन्द्रदैवतो कस्य रसस्य विद्यते ?
(1) करुणरसस्य
(2) शृंगाररसस्य
(3) वीररसस्य
(4) हासस्य

46. निष्ठीवनास्यवलननेत्रसङ्कोचनादयः अनुभावाः कस्य रसस्य भवन्ति ?
(1) रौद्ररसस्य
(2) अद्भुतरसस्य
(3) भयानकरसस्य
(4) बीभत्सरसस्य

47. भवेदभिनयोऽवस्थानुकारः सः कतिविधः ?
(1) पञ्चविधः
(2) चतुर्विधः
(3) त्रिविधः
(4) द्विविधः

48. नाटके एक एवाङ्गीरसो भवेत् –
(1) वीरो हास्य एव वा
(2) करुणो वीर एव वा
(3) शृंगारो वीर एव वा
(4) शृंगारः शान्त एव वा

49. नाटके मुख्याः कार्यव्यापृतपुरुषाः भवेयुः –
(1) चत्वारः पञ्च वा
(2) द्वौ त्रयः वा
(3) पञ्च षड् वा
(4) त्रयः चत्वारो वा

50. एकान्वये सति अन्तरैकार्थसम्बन्धः कथ्यते –
(1) प्रकरणम्
(2) नाटकम्
(3) सन्धिः
(4) प्रहसनम्

51. समुचितेन प्रदेन रिक्तस्थानं पूरयत –
फलप्रधानोपायस्य ______ ।
लक्ष्यालक्ष्य इवोद्भेदो यत्र प्रतिमुखं च तत् ।
(1) प्रागुद्भिन्नस्य किञ्चन
(2) मुखसन्धिनिवेशिनः
(3) मुख्यफलोपाय
(4) एकार्थमुपनीयन्ते

52. कस्मिन् रूपके रौद्ररसः अङ्गी रसः भवेत् –
(1) डिमे
(2) प्रकरणे
(3) भाणे
(4) व्यायोगे

53. महाकाव्ये एकोऽङ्गी रसो भवेत् –
(1) वीर – शृङ्गार – भयानकेषु एकः
(2) शान्त – करुण – वीरेषु एक
(3) शृङ्गार – वीर – शान्तेषु एकः
(4) वीर – हास्य – शृङ्गारेषु एकः

54. रससम्प्रदायस्य प्राचीनतमः आचार्यः कः ?
(1) आचार्यः आनन्दवर्धनः
(2) आचार्यः विश्वनाथः
(3) आचार्यः मम्मटः
(4) आचार्यः भरतमुनिः

55. नाट्यशास्त्रस्याभिनयान् कस्माद् वेदात् जग्राह ?
(1) ऋग्वेदात्
(2) यजुर्वेदात्
(3) सामवेदात्
(4) अथर्ववेदात्

56. काव्यालङ्कारः कस्य कृतिः ?
(1) भामहस्य
(2) भरतमुनेः
(3) वामनस्य
(4) क्षेमेन्द्रस्य

57. "रीतिरात्मा काव्यस्य" इति केनोक्तम् ?

(1) विश्वनाथेन

(2) वामनेन

(3) कुन्तकेन

(4) जगन्नाथेन

58. आनन्दवर्धन: कश्मीरनरेशस्य कस्य सभापण्डित: आसीत् ?

(1) महेन्द्रपालस्य

(2) महेन्द्रवर्मण:

(3) जयापीडस्य

(4) अवन्तिवर्मण:

59. आनन्दवर्धनानुसारं काव्यस्यात्मा विद्यते –

(1) रीति:

(2) रस:

(3) ध्वनि:

(4) गुण:

60. अभिनवगुप्तस्य साहित्यिकगुरु: आसीत् –

(1) राजशेखर:

(2) भट्टेन्दुराज:

(3) शतानन्द:

(4) शंखदत्त:

61. भरतरससूत्रस्य "निष्पत्ति:" इत्यस्य कोऽर्थ: अभिनवगुप्तेन वर्णित: ?

(1) भुक्ति:

(2) अनुमिति:

(3) उत्पत्ति:

(4) अभिव्यक्ति:

62. वक्रोक्तिजीवितकारेण कुन्तकेन वक्रोक्ते: कतिविधा: अङ्गीकृता: ?

(1) चतुर्विधा:

(2) षड्विधा:

(3) नवविधा:

(4) अष्टविधा:

63. आचार्य: क्षेमेन्द्र: साहित्यविद्यां कस्माद धीतवान् ?

(1) प्रकाशेन्द्रपादात्

(2) आनन्दवर्धनपादात्

(3) अभिनवगुप्तपादात्

(4) अनन्तपादात्

64. "काव्यप्रकाशस्य कृता गृहे गृहे, टीकास्तथाप्येष तथैव दुर्गम: ।" उपर्युक्तं कथनं केनोक्तम् –

(1) महेश्वरभट्टाचार्येण

(2) कमलाकरभट्टेन

(3) नरसिंह ठक्कुरेण

(4) डॉ. पारसनाथेन

65. पीयूषवर्ष–जयदेवस्य रचना विद्यते –

(1) सरस्वतीकण्ठाभरणम्

(2) अभिनवभारती

(3) प्रसन्नराघवम्

(4) औचित्यविचारचर्चा

66. विश्वनाथकवि राजस्य पिता चन्द्रशेखर: कलिङ्गनरेशस्य क: आसीत् ?

(1) सचिव:

(2) सभापण्डित:

(3) सखा

(4) सान्धिविग्रहिक:

67. साहित्यदर्पणस्य कस्मिन् परिच्छेदे काव्यदोषाः प्रतिपादिताः ?

(1) अष्टमे परिच्छेदे

(2) सप्तमे परिच्छेदे

(3) नवम परिच्छेदे

(4) पञ्चमे परिच्छेदे

68. "निर्माय नूतनमुदाहरणानुरूपं काव्यं मयाऽत्रविहितं न परस्य किञ्चित्" । इत्यत्र श्लोके "मया" केन ? 'अत्र' कुत्र ? इति सूचयत ।

(1) मम्मट्टेन, काव्यप्रकाशे

(2) विश्वनाथेन, साहित्यदर्पणे

(3) पण्डितराजजगन्नाथेन, रसगङ्गाधरे

(4) आनन्दवर्धनेन, ध्वन्यालोके

69. शिशुपालवधस्य प्रथमसर्गस्य प्रथमे श्लोके किं नाम मङ्गलाचरणम् ?

(1) नमस्कारात्मकं मङ्गलाचरणम्

(2) आशीर्वादात्मकं मङ्गलाचरणम्

(3) वस्तुनिर्देशात्मकं मङ्गलाचरणम्

(4) मङ्गलात्मकं मङ्गलाचरणम्

70. शिशुपालवधमहाकाव्यस्य प्रथमे सर्गे प्रायेण किं छन्दः प्रयुक्तम् ?

(1) उपजाति – छन्दः

(2) द्रुतविलम्बित – छन्दः

(3) भुजङ्ग् प्रयात – छन्दः

(4) वंशस्थ – छन्दः

71. कस्य पुरे ऋतवः वास्तव्य – कुटुम्बितां ययुः ?

(1) कंसस्य

(2) हिरण्यकशिपोः

(3) शिशुपालस्य

(4) रावणस्य

72. समुचितपदेन सूक्तिं पूरयत – "सदाभिमानैकधनाः हि ______ ।"

(1) मानिनः

(2) गुणिनः

(3) धनिनः

(4) हस्तिनः

73. वपुषा चतुर्भुजो मुखेन पूर्णेन्दुनिभस्त्रिलोचनः कः आसीत् ?

(1) बलरामः

(2) श्रीकृष्णः

(3) शिशुपालः

(4) नारदः

74. "सतीव योषित्प्रकृतिः" कीदृशी भवति ? शिशुपालवधानुसारमुत्तरयत –

(1) सुविशाला

(2) सुनिश्चला

(3) सुचञ्चला

(4) सुसंस्कृता

75. बहिर्विकारं प्रकृतेः पृथग्विदुः पुरातनं त्वां पुरुषं पुराविदः इत्यत्र श्लोके "पुरातनः पुरुषः" कः वर्णितः ?

(1) श्रीकृष्णः

(2) नारदः

(3) बलरामः

(4) माघः

76. "अधिपतिरिव दण्डकारण्यस्य, नायक इव सर्ववनस्पतीनाम्" इत्यत्र कविना कस्य वर्णना कृता ?

(1) आश्रमस्य

(2) विन्ध्यस्य

(3) शाल्मलीवृक्षस्य

(4) पम्पासरोवरस्य

77. गजतुरगपुरुषस्त्रीलक्षणाभिज्ञ:
सकलभूतलरत्नभूत: क: कविना वर्णित: ?
(1) वैशम्पायन:
(2) शूद्रक:
(3) हारीत:
(4) जाबालि:

78. महाकविबाणस्य पितु: नाम किम् ?
(1) कुबेर:
(2) वत्स:
(3) अर्थपति:
(4) चित्रभानु:

79. राज्ञ: शूद्रकस्य वेत्रवत्या परिगता काभिधाना नगरी राजधान्यासीत् ?
(1) मथुरा
(2) उज्जयिनी
(3) विदिशा
(4) अमरावती

80. आमत्तकोकिललोचनच्छविनीलपाटल:
कषायमधुर: कस्य फलस्य रस: शुकेनापीत: ?
(1) दाडिमफलरस:
(2) द्राक्षाफलरस:
(3) आमलकीफलरस:
(4) जम्बूफलरस:

81. समुचितेन पदेन सूक्तिं पूरयत –
"खलं हि खलु मे ______ ।"
(1) हृदयम्
(2) जीवनम्
(3) भवनम्
(4) मन:

82. मृच्छकटिकानुसारं प्रकामपरं षष्ठंमहापातकं वर्तते –
(1) निर्गुणता
(2) मूर्खता
(3) निर्धनता
(4) अकुलीनता

83. निम्नलिखिता सूक्ति: कस्माद् ग्रन्थात् समुद्धृता ?
"छिद्रेष्वनर्था बहुलीभवन्ति" ।
(1) शिशुपालवधमहाकाव्यात्
(2) रघुवंशमहाकाव्यात्
(3) कादम्बरीकथामुखात्
(4) मृच्छकटिकात्

84. "अपापानां कुले जाते मयि पापं न विद्यते ।"
उपर्युक्ते वाक्ये "मयि" इति कस्मिन् पापं न विद्यते ?
(1) चारुदत्ते
(2) विदूषके
(3) शर्विलके
(4) अधिकरणिके

85. "अयं हि पातकी विप्रो न वध्य: ।" इति क: अब्रवीत् ? मृच्छकटिकानुसारंमुत्तरं देयम् ?
(1) शुक्र:
(2) मनु:
(3) शूद्रक:
(4) नारद:

86. मृच्छकटिकप्रकरणस्य तृतीयोऽङ्कस्य नाम किम् ?
(1) अलङ्कार–न्यास:
(2) दुर्दिन:
(3) सन्धिच्छेद:
(4) प्रवहणविपर्यय:

87. वसन्तसेनाया: दासी का ?
(1) मदनिका
(2) रदनिका
(3) घूता
(4) वासवदत्ता

88. मृच्छकटिक-नामकरण-प्रसङ्ग कस्मिन् अङ्के वर्णित: ?
(1) तृतीयेऽङ्के
(2) षष्ठेऽङ्के
(3) पञ्चमेऽङ्के
(4) सप्तमेऽङ्के

89. 'भारती कवेर्जयति' इत्यत्र कीदृशं मङ्गलाचरणं आचार्यमम्मट: प्रतिपादयति ?
(1) नमस्कारात्मकम्
(2) वस्तुनिर्देशात्मकम्
(3) आशीर्वादात्मकम्
(4) सर्वविधमंगलात्मकम्

90. काव्यप्रयोजनेषु सकलप्रयोजनमौलिभूतं कीदृशं प्रयोजनं निर्दिशति ?
(1) यशसे
(2) सद्य: परनिर्वृतये
(3) शिवेतरक्षतये
(4) अर्थकृते

91. काव्यकारणे कवित्वबीजरूप: संस्कारविशेष: कथ्यते –
(1) काव्यज्ञशिक्षा
(2) अभ्यास:
(3) निपुणता
(4) शक्ति:

92. समुचितेन पदेन काव्यसूत्रं पूरयत –
"अतादृशि गुणीभूतव्यङ्ग्यं _____ तु मध्यमम्"
(1) वाच्ये
(2) व्यङ्ग्ये
(3) लक्ष्ये
(4) रसे

93. काव्यस्य कस्य धर्मा: गुणा: भवन्ति ?
(1) शब्दार्थयो:
(2) रसस्य
(3) अलङ्कारस्य
(4) ध्वने:

94. येऽङ्गद्वारेण तं रसमुपकुर्वन्ति ते के ?
(1) अलङ्कारा:
(2) रीतय:
(3) गुणा:
(4) दोषा:

95. समुचितेन पदेन कारिकां पूरयत –
"आह्लादकत्वं माधुर्यं _____ द्रुतिकारणम्" ।
(1) विप्रलम्भे
(2) करुणे
(3) शृङ्गारे
(4) तच्छान्ते

96. मम्मटेन केन गुणेन अर्थव्यक्ति: गृहीता ?
(1) प्रसादेन
(2) माधुर्येण
(3) ओजसा
(4) दोषेण

97. चित्तस्य विस्ताररूपदीप्तत्वजनकं किम् ?
(1) माधुर्यम्
(2) प्रसाद:
(3) ओज:
(4) सौकुमार्यम्

98. आरोहावरोहक्रमरूप: क: गुण: ?
(1) श्लेष:
(2) समाधि:
(3) प्रसाद:
(4) उदारता

99. 'मनोविज्ञानं मानवव्यवहारस्य विज्ञानमस्ति' इति कथनं कस्य अस्ति ?
(1) कालसनिकमहोदस्य
(2) ब्रिजेजमहोदयस्य
(3) मनममहोदयस्य
(4) बोरिगमहोदयस्य

100. बालकस्य सर्वाङ्गीणविकास: सम्यग्रूपेण भवेत्, तदर्थं किं करणीयम् ?
(1) बालकस्य कृते वस्त्रदानम्
(2) बालकानां कृते शिक्षादानम्
(3) बालकानां कृते शिक्षया सह मनोविज्ञानस्य संयोजनम्
(4) बालकानां कृते क्रीडासामग्रीप्रदानम्

101. "शिक्षामनोविज्ञानं शैक्षणिक विकासस्य क्रमिकाध्ययनमस्ति" इति कथनं कस्य पाश्चात्यविदुष: विद्यते ?
(1) सी.ई. स्किनरमहोदयस्य
(2) जे.ए. स्टीफनमहोदयस्य
(3) स्टाउटमहोदयस्य
(4) सी.एच. जुडमहोदयस्य

102. कं शिक्षाशास्त्रिण: शिक्षाया: केन्द्रबिन्दुं मन्वते ?
(1) वस्त्रम्
(2) गृहम्
(3) पुस्तकम्
(4) बालकम्

103. छात्रेषु ज्ञानस्य क्रियायाश्चाधिगमार्थमुचित-वातावरणस्य निर्माणं क: करोति ?
(1) श्यामपट्ट:
(2) अध्यापक:
(3) पाठ्यक्रम:
(4) विद्यार्थी

104. "ज्ञानाभिवृत्त्योरर्जनम् अधिगमो भवति" इति कस्य कथनमस्ति ?
(1) क्रो-क्रो-महोदयस्य
(2) बर्नार्डमहोदयस्य
(3) गिलफर्डमहोदयस्य
(4) ई. स्किनरमहोदयस्य

105. शिक्षणाधिगम: सक्रिय: प्रभावी च भवति –
(1) मानव: एक: सामाजिक: प्राणी ।
(2) चेत् बालक: कार्याय प्रेरित: स्यात् ।
(3) यदि विद्यार्थी शिक्षणप्रक्रियायां क्रियाशील: स्यात् ।
(4) चेत् बालक: अधिगमक्रियां पश्येत् ।

106. सफलतमस्य शिक्षकस्य परमं कर्त्तव्यमस्ति –
(1) पाठनकाले छात्राणां मानसिकं शारीरिकं च स्वास्थ्यं मनसि कृत्वा पाठयेत् ।
(2) नवीनान् विधीन् उपयुञ्जीत ।
(3) मनोवैज्ञानिकपरिस्थितिमुत्पादयेत् ।
(4) उपर्युक्तं सर्वम् ।

107. उद्दीपनानुक्रियाया: सिद्धान्तस्य प्रवर्तकोऽस्ति –
(1) स्टाउटमहोदय:
(2) कॉलसनिकमहोदय:
(3) थॉर्नडाइकमहोदय:
(4) जी.एल.ऐण्डर्सनमहोदय:

108. अनुकूलितानुक्रियाया: सिद्धान्तस्य प्रतिपादकेन पवलवमहोदयेन कस्य उपरि प्रयोग: कृत: ?
(1) मयूरस्य उपरि
(2) शुन: उपरि
(3) काकस्य उपरि
(4) मूषकस्य उपरि

109. "बुद्धिः ज्ञानार्जनस्य क्षमता अस्ति" इति कथनं विद्यते –
(1) टरमैनमहोदयस्य
(2) वुडरोमहोदयस्य
(3) वैश्लरमहोदयस्य
(4) स्टर्नमहोदयस्य

110. पाश्चात्यविद्वांसः इमामवस्थां "टीन एज" (Teen Age) इति कथयन्ति । सा कावस्था ?
(1) शैशवावस्था
(2) प्रौढ़ावस्था
(3) बाल्यावस्था
(4) किशोरावस्था

111. विविधमानसिकयोग्यताः विकसिताः कदा भवन्ति ?
(1) किशोरे
(2) शैशवे
(3) बाल्ये
(4) सदैव

112. किशोरस्य मानसिक द्वन्द्वस्य स्थितौ का शिक्षा परमावश्यकी भवति ?
(1) शारीरिक शिक्षा
(2) व्यवसाय शिक्षा
(3) नैतिक शिक्षा
(4) भ्रमण शिक्षा

113. अध्यापकानां व्यवहारः किशोराणां कृते कीदृशो भवेत् ?
(1) अनुशासनं करणीयम् ।
(2) प्रेम्णः सहानुभूतेश्च भावः स्थापनीयः ।
(3) उत्सवानामायोजनं किशोराणां हस्ते न दातव्यम् ।
(4) साहित्याध्ययनस्य प्रेरणा न प्रदानीया ।

114. मेरिडिथमहोदयानुसारं कस्मिन् वर्षे विकासस्य गतिः मन्दा भवति ?
(1) प्रथमद्वयोः वर्षयोः
(2) 11 – 15 वर्षे
(3) 16 – 18 वर्षे
(4) 20 वर्षपर्यन्तम्

115. मानवानां जीवने संवेगात्मकविकासः 'प्रेम' कदा भवति ?
(1) पञ्चदशमासे
(2) चतुर्थमासे
(3) पञ्चममासे
(4) दशममासे

116. कस्यचिद् जनस्य वास्तविकमायुः 20 वर्षाणि तथा च मानसिकमायुः 25 वर्षाणि प्राप्यते, तदा तस्य बुद्धिलब्धिर्भविष्यति –
(1) 125
(2) 130
(3) 110
(4) 120

117. टरमैनमहोदयेन बुद्धिलब्धेः आधारेण बालकानां सामान्यबुद्धेः बुद्धिलब्धिः भवति –
(1) 50 तः 70
(2) 70 तः 80
(3) 80 तः 90
(4) 90 तः 110

118. मानसिक योग्यता – परीक्षणमिदं केन निर्मितम् ? अस्य परीक्षणस्य प्रयोगः 12 तः 19 वर्षं यावत् छात्राणां कृते वर्तते ।
(1) डॉ. एम.सी. जोशीमहोदयेन
(2) डॉ. चन्द्रमोहन भाटियामहोदयेन
(3) वैश्लरमहोदयेन
(4) एस.एस. जलोटामहोदयेन

**119.** सम्प्रेषण – शिक्षणाधिगमे "शारीरिक-भाषा" (Body Language) कीदृशं सम्प्रेषणमाध्यमं विद्यते

(1) शाब्दिक – सम्प्रेषणम्

(2) अशाब्दिक – सम्प्रेषणम्

(3) लिखित – सम्प्रेषणम्

(4) मौखिक – सम्प्रेषणम्

**120.** पुस्तकालयस्य पुस्तकानां ग्रन्थानां च पृथक् – वर्गीकरणाय दशमलव – प्रणाली केन प्रस्तुता ?

(1) डेवी (Dewey) महोदयेन

(2) ब्लुम (Blum) महोदयेन

(3) मन (Munn) महोदयेन

(4) बोरिंग (Boring) महोदयेन

**121.** निम्नलिखितेषु प्रक्षेपी-दृश्यसाधनं विद्यते –

(1) मूक – चलचित्रम्

(2) मानचित्रम्

(3) मॉडल

(4) पोस्टर

**122.** शिक्षणाधिगमे भ्रमणं, पर्यटनं, प्रयोगशाला कार्यशाला च विद्यन्ते

(1) श्रव्यसाधनम्

(2) दृश्यश्रव्यसाधनम्

(3) दृश्यसाधनम्

(4) क्रियात्मकसाधनम्

**123.** निम्नलिखितेषु हार्डवेयर (Hardware) उदाहरणं नास्ति

(1) चलचित्रम्

(2) मैजिक् लैटर्न

(3) आकाशवाणी (Radio)

(4) मानचित्रम्

**124.** निम्नलिखितेषु संगणकस्य "आउटपुट-उपकरण युनिट" (Output Devices Unit) मध्ये न गण्यते –

(1) मॉनीटर (Moniter)

(2) लाइट पैन (Light pen)

(3) प्लोटर्स (Plotters)

(4) साउण्ड कार्ड (Sound card)

**125.** संगणकमन्त्रस्य पठन / लेखन स्मृतिः (Read / Write memory) केन नाम्ना ज्ञायते ?

(1) माइक्रो प्रोसेसर (Micro Processor)

(2) रोम (ROM)

(3) रैम (RAM)

(4) हार्ड डिस्क (Hard-disk)

**126.** बहूनां संगणकानां परस्परं सम्प्रेषणाय कस्यचित् केन्द्रीय संगणकस्य (Host Computer) आवश्यकता न भवति । तत् कीदृशं "नेटवर्क" कथ्यते ?

(1) स्टार नेटवर्क (Star Network)

(2) रिंग नेटवर्क (Ring Network)

(3) बस नेटवर्क (Bus Network)

(4) लैन (LAN)

**127.** लिखितपत्रावलीनां निर्माणं संपादनं मुद्रणं च केन संगणक – अनुप्रयोगेण वा एप्लीकेशन – सॉफ्टवेयर द्वारा कर्तुं शक्यन्ते ?

(1) वर्ड प्रोसेसर (Word Processor)

(2) स्प्रेड शीट (Spread Sheets)

(3) ग्राफिक प्रस्तुतीकरणम् (Presentation Graphics)

(4) डेटाबेस मैनेजमैन्ट सिस्टम (Database Management System)

**128.** www इत्यस्य संक्षेपनाम्नः पूर्णनाम किं विद्यते ?

(1) web wide world

(2) world web wide

(3) world wide web

(4) wide world web

129. चन्द्रालोकस्य मङ्गलाचरणे स्तुति: विद्यते
(1) सीताया:
(2) वाग्देवताया:
(3) लक्ष्म्या:
(4) दुर्गाया:

130. "अङ्गीकरोति य: काव्यं शब्दार्थावनलङ्कृती" अस्यां कारिकायां "य:" इति पदेन क: संकेतित: ?
(1) आचार्यविश्वनाथ:
(2) आचार्यजयदेव:
(3) आचार्यमम्मट:
(4) आचार्यक्षेमेन्द्र:

131. चन्द्रालोकानुसारं विभक्त्यन्तं किम् ?
(1) कारकम्
(2) वाक्यम्
(3) महावाक्यम्
(4) पदम्

132. चन्द्रालोककारस्य पितरौ कौ ?
(1) पार्वतीमहेश्वरौ
(2) लक्ष्मीनारायणौ
(3) सुमित्रामहादेवौ
(4) सीतारामौ

133. काव्यशोभाविघातको वर्तते
(1) दोष:
(2) गुण:
(3) अलङ्कार:
(4) रस:

134. च्युतसंस्कृतिं: संविन्दते
(1) काव्यविरुद्धम्
(2) शास्त्रविरुद्धम्
(3) लोकविरुद्धम्
(4) व्याकरणविरुद्धम्

135. "स हन्ति हन्त कान्तारे कान्त: कुटिलकुन्तल:" इत्यस्मिन् श्लोकांशे कस्मिन् पदे 'असमर्थदोष:' –
(1) हन्त
(2) कान्त
(3) हन्ति
(4) कुन्तल

136. "हिमांशोर्हारधिक्कारजागरे यामिका: करा:" इत्यत्रोदाहरणे क: दोष: ?
(1) नेयार्थ:
(2) श्रुतिकटु:
(3) अप्रयुक्त:
(4) असमर्थ:

137. विधौ समासपिहिते सति को दोषो भवति –
(1) निरर्थकदोष:
(2) अविमृष्ट-विधेयांशदोष:
(3) अवाचकदोष:
(4) क्लिष्टदोष:

138. 'चेत् विशेष्ये विशेषणात् विशेष: न स्यात्' तर्हि कोऽसौ दोष: कथ्यते –
(1) अपुष्टार्थदोष:
(2) कथितदोष:
(3) निहतार्थदोष:
(4) असमर्थदोष:

139. निम्नलिखितेषु न्यूनदोषस्योदाहरणं विद्यते –
(1) धत्ते नभस्तलं भास्वानरुणं तरुणै: करै: ।
(2) हरिप्रियापितृवधूप्रवाह-प्रतिमं वच: ।
(3) भवत: शत्रून् दशत्यसिलताफणी ।
(4) त्वत्खड्गसम्भूतयश: पुष्पं नभस्तटम् ।

140. समुचितेन पदेन रिक्तस्थानं पूरयत –
रसाद्यनुचिते वर्णे ______ विदु: ।
(1) अविमृष्टविधेयांशम्
(2) अप्रयुक्तम्
(3) प्रतिकूलाक्षरम्
(4) श्रुतिकटुम्

141. यः दोषाङ्कुशः सः कतिधा दोषं निवारयति ?

(1) एकधा

(2) द्विधा

(3) चतुर्धा

(4) त्रेधा

142. "इयमद्भुतशाख्यग्रकेलिकौतुकवानरी" उदाहरणमिदं कं दोषं संकेतयति –

(1) अधिकदोषम्

(2) अपुष्टार्थदोषम्

(3) अनुचितार्थदोषम्

(4) क्लिष्टदोषम्

143. "दधार गौरी हृदये देवं हिमकराङ्कितम्" इत्यस्मिन्नुदाहरणे किं पदं निरर्थकमिति नैव त्याज्यम् ?

(1) हिम–

(2) हि

(3) देवम्

(4) कराङ्कितम्

144. "अमन्दानन्दसन्दोह स्वच्छन्दास्पद-मन्दिरम्" इत्यत्र कोऽलङ्कारः ?

(1) छेकानुप्रासः

(2) वृत्त्यनुप्रासः

(3) लाटानुप्रासः

(4) अर्थानुप्रासः

145. उपमानोपमेयत्वे यत्रैकस्यैव जागृतः स्यात् तत्र को नामालङ्कारः भवेत् –

(1) अनन्वयः

(2) उपमा

(3) यमकः

(4) परिणामः

146. यत्रोपमानोपमेययोरभेदः पर्यवस्यति तत्र कोऽलङ्कारः भवति ?

(1) विशेषोक्तिः

(2) विनोक्तिः

(3) परिणामः

(4) उत्प्रेक्षा

147. "नायं सुधांशुः किं तर्हि व्योमगङ्गासरोरुहम्" इत्यत्रोदाहरणे कः अलङ्कारः ?

(1) रूपकम्

(2) उल्लेखः

(3) उपमा

(4) अपह्नुतिः

148. निम्नलिखितेषु काव्यलिङ्गस्योदाहरणं विद्यते –

(1) जितोऽसि मन्दकन्दर्प मच्चितेऽस्ति त्रिलोचनः ।

(2) सुधांशुकलितोत्तंसस्तापं हरतु वः शिवः ।

(3) कान्तेन पृष्टा रहसि मौनमेवोत्तरं ददौ ।

(4) स्त्रीभिः कामः प्रियैश्चन्द्रः कालः शत्रुभिरैक्षि सः ।

149. "उपमा यत्र सादृश्यलक्ष्मीरुल्लसति द्वयोः ।" अत्र "द्वयोः" इत्यत्र कोऽर्थः

(1) साधारणधर्म – वाचकशब्दयोः

(2) उपमेय – साधारणधर्मयोः

(3) उपमानोपमेययोः

(4) धर्माधर्मयोः

150. यत्र निह्नुतिं विना हेत्वादिः उन्नीयते, तत्र कोऽयमलङ्कारः ?

(1) अनुमानालङ्कारः

(2) उत्प्रेक्षालङ्कारः

(3) यमकालङ्कारः

(4) रूपकालंकारः